तड् इति भाषा । (यथा, हरिवंशे । ६७।५५ ।
"कर्णबमार्गौ आवेते इदस्यास्य तटाद्भुतौ ।"
महादेवे, पुं । सर्व्वोच्छ्रितललाटस्य तथात्वम् ।
यथा, महाभारते । १२ । २८४ । ३६ ।
"नमस्तटाय तथाय: तटानाम्पतये नमः ।")
तटस्थं, क्ली, लक्षणविशेषः । तस्य स्वरूपं यथा,
तद्भिन्नत्वे सति तद्बोधकत्वम् । तथाच ।
"स्वरूपं तटस्थं द्विधालक्षणं स्यात्
स्वरूपस्य बोधो यतो लक्षणाभ्याम् ।
स्वरूपे प्रविष्टात् स्वरूपेऽप्रविष्टात्
यथा काकवन्तो गृहाः खं विलश्च ॥"
इति वेदान्तकारिका ॥
(तटे तिष्ठतीति । स्था+कः ।) तटस्थिते,
त्रि ॥ (उदासीनः । यथा, नैषधे । ३ । ५५ ।
"धिक् चापले वत्सिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्ग्या
मया तटस्थस्त्वमुपद्रुतोऽसि ॥"
समीपस्थः । यथाह बलः ।
"तटस्थः स्यादुदासीने तीरस्थनिकटस्थयोः ॥")
तटाकः, पुं, (तटमकति गच्छतीति । अक+
"कर्म्मण्यण् ।"३ । २ । १ । इत्यण् ।) तड़ागः ।
पद्मादियुक्तसरः । इति शब्दरत्नावली । (यथा,
वैराग्यशतके । ४६ ।
"प्रादेशमात्रमुदरं परिपूरयितुं क्रियागयं यत्नः ।
चुलुकेनाम्भः पातुं खनितव्यः किं तटाकोऽपि ॥")
तटिनी, स्त्री, (तटमस्त्यस्या इति । तट+"अत
इनिठनौ ।" ५ । २ । ११५ । इति इनि-
स्ततो ङीप् ।) नदी । इत्यमरः । १।१०।३० ॥
(यथा, आर्य्यासप्तशत्याम् । ६६२ ।
"हृत्वा तटिनि ! तरङ्गैर्भ्रमितश्चक्रेषु गाम्भये
निहितः ।
पत्रदलवल्कलरहितस्त्वयान्तरिक्षे तरुस्त्यक्तः ॥")
तटी, स्त्री, (तटति उच्छ्रिता भवतीति । तट+
अच् । ङीष् ।) तीरम् । इत्यमरः । १।१०।७ ॥
(यथा, साहित्यदर्पणे । ३ । ८६ ।
"मालयश्च स्तम्भाग्रश्च नद्यादीनां तटी तथा ॥")
तड, इ ड आहतौ । इति कविकल्पद्रुमः ॥ (भ्वा-
आत्म-सकं-सेट् ।) इ, तण्डते । ड, तण्डते ।
इति दुर्गादासः ॥
तड, क लिखि । आहतौ । इति कविकल्पद्रुमः ॥
(चुरा-परं-अकं-सकं च-सेट् ।) क, ताड़-
यति । लिखि दीप्तौ । इति दुर्गादासः ॥
तड़गः, पुं, (तड्यते आहन्यते ऊर्म्मिभिरिति ।
तड्+आगः । पृषोदरादित्वात् आलोपे साधुः ।)
तड़ागः । इति द्विरूपकोषः ॥
तड़ाकः, पुं, (तड्यते आहन्यते ऊर्म्मिमालाभि-
रिति । तड़ि आहतौ+"पिनाकादयश्च ।"
उणां ४ । १५ । इति आकप्रत्ययेन निपातनात्
साधुः ।) तड़ागः । इति शब्दरत्नावली ॥
तड़ाका, स्त्री, (तड़ाक+स्त्रियां टाप् ।) नदी-
समुद्राणां तटभागः । (तड़ि आहतौ+भावे

घञ् ।) आघातः । इति संक्षिप्तसारे उणादि-
वृत्तिः ॥ (प्रभा । इत्युज्ज्वलदत्तः । ४ । १५ ॥)
तड़ागः, पुं क्ली, (तड+तड़ागादयश्च । इति
आगप्रत्ययेन निपातनात् साधुः ।) अम्बुकूटकः ।
इति मेदिनी । गे, ३६ ॥ (तड्यते आहन्यते
ऊर्म्मिमालाभिरिति । तड़ि आहतौ+कर्म्मणि
आकः ।) पद्मादियुक्तं सरः । तत्पर्य्यायः ।
पद्माकरः २ । इत्यमरः । १ । १० । २८ ॥
तड़ाकः ३ तटाकः ४ । इति शब्दरत्नावली ॥
तड़गः ५ । इति द्विरूपकोषः ॥ शतधनुः-
धनुःपरिमाणजलाशयः । चतुर्दिक्षु पञ्चशता-
धिकशतहस्तान्यूनतायां सहस्रद्वितयहस्तान्यूनत्वेन
तड़ागः । इति नयवर्द्धमानधृतो वशिष्ठः ॥ * ॥
तस्य जलगुणाः । वातकारित्वम् । स्वादुत्वम् ।
कषायत्वम् । पाके कटुत्वम् । शिशिरहिमकाले
प्रशस्तत्वञ्च । इति राजवल्लभः ॥ * ॥ तस्योत्-
सर्गविधिर्यथा,—
पुलस्त्य उवाच ।
"इत्थं राजन्महाबाहो ! तड़ागादिषु यो विधिः ।
पुराणेष्वितिहासेषु मन्यते राजसत्तम ! ॥
प्राप्य पक्षं शुभं शुक्लमागते चोत्तरायणे ।
पुण्येऽह्नि विप्रैः क्रियते कृत्वा ब्राह्मणवाचनम् ॥
प्राक्प्रस्रवणादम्भस्तड़ागस्य समीपतः ॥
चतुर्हस्तसमा वेदी चतुरस्रा समन्ततः ।
तथा षोड़शहस्तः स्यान्मण्डपश्च चतुर्मुखः ॥
वेद्या उत्तरतो गर्त्तारत्निमात्रा तु मेखला ।
नवसप्ताथवा पञ्च योनिवक्त्रा नृपात्मज ! ॥
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुल-
विस्तृता ।
सर्व्वे स्वहस्तमात्राः स्युस्त्रिपर्व्वोच्छ्रितमेखलाः ॥
सर्व्वे च सर्व्ववर्णाः स्युः पताकाध्वजसंयुताः ।
अश्वत्थोडुम्बरप्लक्षवटशाखाकृतानि च ॥
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥
शुभास्तत्राष्ट होतारो द्वारपालास्तथापरे ।
अष्टौ तु जापकाः कार्य्या ब्राह्मणा वेदपारगाः ॥
सर्व्वलक्षणसम्पूर्णा मन्त्रविद्विजितेन्द्रियाः ।
कुलशीलसमायुक्ताः स्थापिता द्विजसत्तमाः ॥
प्रतिगर्त्तेषु कलशा यज्ञोपस्करणानि च ।
व्यजनञ्चासनं शुभ्रं ताम्रपात्रं सुविस्तरम् ॥
आचार्य्यः प्रक्षिपेद्भूम्यामनुमन्त्र्य विचक्षणः ।
अरत्निमात्रो यूपः स्यात् क्षीरिवृक्षविनिर्म्मितः ॥
यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥
हेमालङ्कारिणः कार्य्याः पञ्चविंशतिरृत्विजः ॥
कुण्डलानि च हैमानि केयूरकटकानि च ।
तथाङ्गुलीपवित्राणि वासांसि विविधानि च ॥
दद्युः समानि सर्व्वेषामाचार्य्ये द्विगुणं पुनः ।
दद्याच्छयनसंयुक्तमात्मनश्चापि यत् कृतम् ॥
सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ ।
तथा कुलीरमण्डूका वायसः शिशुमारकः ॥
एवमासाद्य तत् सर्व्वं स्वर्णपात्रं विशाम्पते ! ।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥
सर्व्वौषध्युदकस्नातः पाठितो वेदपुङ्गवैः ।

यजमानः सपत्नीकः पुत्त्रपौत्त्रसमन्वितः ॥
पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् ।
ततो मङ्गलशब्देन भेरीणां निस्वनेन च ॥
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन चार्च्चितम् ।
षोड़शारं ततश्चक्रं पद्मरागसुशोभनम् ॥
वेद्यामुपरि तत् कृत्वा ग्रहान् सहपतींस्तथा ।
संन्यसेत्ततः सर्व्वान् प्रतिदिक्षु विचक्षणः ॥
तत् पात्रं स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितम् ।
ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः ॥
विनायकञ्च विन्यस्य कमलामम्बिकां तथा ।
शान्त्यर्थं सर्व्वलोकानां भूतग्रामं न्यसेत्ततः ।
पुष्पभक्ष्यफलैर्युक्तमेवं कृत्वाधिवासनम् ।
कुम्भांश्च रत्नगर्भांश्च वासोभिः परिवेष्टयेत् ॥
गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्ततः ।
पठध्वमिति तान् ब्रूयादाचार्य्यमपि पूजयेत् ॥
बह्वृचौ पूर्व्वतः स्थाप्यौ दक्षिणे च यजुर्व्विदौ ।
पश्चिमे सामगौ स्थाप्यावुत्तरेणाप्यथर्व्वणौ ॥
उदङ्मुखो दक्षिणतो यजमान उपाविशेत् ।
पठध्वमिति तान् ब्रूयात् यजध्वमिति याजकम् ॥
उत्तमं मन्त्रपाठेन तिष्ठध्वं मन्त्रजापकाः ।
एवमादिश्य तान् सर्व्वान् पर्य्युक्षाग्निं स
मन्त्रवित् ॥
जुहुयाद्वारुणैर्म्मन्त्रैराज्यञ्च समिधस्तथा ।
ऋत्विग्भिश्चैव होतव्यं वारुणैरेव सर्व्वतः ।
वैराजं पौरुषं सूक्तं सौक्तं चन्द्रं सुसंहितम् ।
शैशवं पञ्चनिधनं गायन्ति ज्येष्ठसामगाः ॥
वामदेव्यं बृहत्साम रौरवं सरथन्तरम् ।
गवां व्रतं विकर्णञ्च रक्षोघ्नं च यशस्तथा ॥
गायन्ति सामगा राजन् ! पश्चिमद्वारमाश्रिताः ।
अथर्व्वणाश्चोत्तरतः शान्तिकं पौष्टिकं तथा ॥
जपन्ते मनसा देवमाश्रिता वरुणं प्रभुम् ।
पूर्व्वेद्युरभितो मन्त्रैरेवं कृत्वाधिवासनम् ॥
गजाश्वरथ्यावल्मीकसंगमहृदगोकुलात् ।
मृदमादाय दद्याच्च प्रक्षिपेच्च यथा तथा ॥
रोचनाञ्च ससिद्धार्थान् गन्धान् गुग्गुलमेव च ।
स्नपनं तस्य कर्त्तव्यं पञ्चगव्यसमन्वितम् ॥
ऋद्धिं कर्त्तुं महामन्त्रैरेवं कृत्वा विधानतः ।
एवं क्षपति रात्र्यार्धान् विधियुक्तेन कर्म्मणा ॥*॥
ततः प्रभाते विमले संजाते तु गवां शतम् ।
ब्राह्मणेभ्यः प्रदातव्यं होमान्ते वाथवा पुनः ॥
पञ्चाशद्वाथ षट्त्रिंशत् पञ्चविंशतिरेव च ।
ततः संवत्सरे प्राप्ते शुद्धे लग्ने सुशोभने ॥
वेदशब्दैश्च गान्धर्व्वैर्व्वाद्यैश्च विविधैः पुनः ।
कनकालङ्कृतां कृत्वा जले गामवतारयेत् ॥
सामगाय च सा देया ब्राह्मणाय विशाम्पते ! ।
प्राचीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ॥
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः ।
धृतांश्चतुर्भिर्व्विप्रैश्च वेदवेदाङ्गपारगैः ॥
महानदीजलोपेतान् दध्यक्षतविभूषितान् ।
उत्तराभिमुखो मुक्तो जलमध्ये प्रकाशयेत् ॥
आथर्व्वणेन सुस्नातः पुनर्म्मामाशयेव च ।
आपो हि ष्ठेतिमन्त्रेण क्षिपेदागत्य मण्डपम् ॥